# सोमनाथस्य सान्निध्ये सम्पन्नं गीर-सोमनाथ-जनपद-संस्कृत-सम्मेलनम्

अस्मिन् वर्षे संस्कृतभारतीद्वारा भारतस्य विभिन्नेषु ५०० जनपदेषु संस्कृतसम्मेलनानि आयोज्यमानानि सन्ति। अस्यामेव शृङ्खलायां २०१५ तमस्य वर्षस्य फेब्रुअरीमासस्य १५ दिनाङ्के प्रभासक्षेत्रस्थस्य सुविख्यातस्य सोमनाथमन्दिरस्य प्राङ्गणे गीर-सोमनाथ-जनपदस्य संस्कृतानुरागिणां विशालं स्नेहसम्मेलनं सम्पन्नम्। सम्मेलनमेतत् श्रीसोमनाथ-संस्कृत-युनिवर्सिटी, श्रीसोमनाथ-ट्रस्ट, अन्यासां च संस्कृताभिमानिनां धार्मिक-शैक्षणिक-सामाजिक-संस्थानां साहाय्येन संस्कृतभारतीद्वारा आयोजित-मासीत्।



वामतः डॉ.महादेवप्रसादमहेता, प्रो.वेम्पटिकुटुम्बशास्त्री, श्रीदिनेशकामतः, श्रीओ.पी.कोहली, राज्यपालभगिनी, श्रीजसाभाईबारडः, श्रीजे.डी.परामरः, श्रीसी.पी.पटेलः

कार्यक्रमस्यास्य अङ्गतया फेब्रुअरीमासस्य षष्ठादेव दिनात् विशेषतया प्रशिक्षिताः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः जनपदस्य प्रत्येकं तालुकाक्षेत्रम् अगच्छन्। तैः तत्र तत्र आयोजितेषु संस्कृत-सम्भाषणशिबिरेषु पाठनं कृतम्। १५ दिनाङ्के आयोजिते जनपद-संस्कृत-सम्मेलने जनपदस्य प्रत्येकस्मात् तालुकाक्षेत्रात् सहस्राधिकाः संभाषणशिबिरच्छात्राः, जनपदस्य प्रतिष्ठिताः नागरिकाः, प्रमुखाः शासकीयाः कर्मचारिणः, महाविद्यालयीयाः छात्राः, श्रेष्ठिनः च भागं वोढुं सोत्साहं समुपस्थिताः।

सम्मेलनस्यास्य आयोजने सोमनाथमन्दिरस्य प्राङ्गणे एव स्थानव्यवस्था, भव्यस्य मण्डपस्य व्यवस्था, ध्वन्यादिव्यवस्था च श्रीसोमनाथन्यासेन कृता आसीत्। कार्यक्रमोऽयं मध्याह्ने २:०० वादनात् सायं ७:०० वादनं यावत् प्रवृत्तः। अस्मै कार्यक्रमाय विशेषतया संस्कृतविज्ञानप्रदर्शिनी, संस्कृतशास्त्र-गौरवप्रदर्शिनी, संस्कृतवस्तुप्रदर्शिनी, संस्कृतविकिपीडियाप्रदर्शिनी च सज्जीकृता आसीत्। जनपदस्य समाहर्त्रा श्रीमता सी. पी. पटेल महाभागेन आसां प्रदर्शिनीनाम् उद्घाटनं कृत्वा सम्मेलनस्य प्रारम्भः कृतः। ततश्च सर्वैरपि



सहभागिभिः प्रदर्शिन्यः अवलोकिताः, संस्कृतभारत्या प्रकाशितं सरलसंस्कृतसाहित्यं च दृष्टम्।

ततः परं नैकैः गणमान्यैः जनैः समं गुजरातराज्यस्य माननीयः राज्यपालः श्री. ओ. पी. कोहली महाभागः औपचारिकीं सभाम् अलङ्कृतवान्। संस्कृतभारत्याः शिबिरेषु अधीत्य अचिरादेव संस्कृतसम्भाषणे नैपुण्यमवाप्तवती स्त्रीरोगतज्ञा वैद्या श्रीमती निमिषा माखणसा सभायाः संचालनं कृतवती। विख्यातस्य कथाकारस्य श्रीमतः महादेव-प्रसाद-महेता-महाभागस्य आध्यक्षे स्वागतसमित्याः सदस्यैः वाचा, फल-पुष्प-राङ्कवादिभिश्च महानुभावानां स्वागतं विहितम्। डो. ललित पटेल महोदयेन कार्यक्रमस्य प्रास्ताविकं कृतम्। ततः सम्प्रति यस्मै संस्कृतसेवायै राष्ट्रपति-पुरस्कारः समुद्घोषितो वर्तते तस्य श्रीसोमनाथसंस्कृतविश्व-विद्यालयस्य कुलपतेः श्रीमतः प्रो. वेम्पटिकुटुम्बशास्त्रिणः विशिष्टा सत्क्रिया माननीयेन राज्यपालेन विहिता।

ततः श्रीसोमनाथन्यासस्य न्यासी संस्कृतविद्वान् श्रीमान् जे. डी. परमारः स्वीये उद्बोधने संस्कृतस्य प्रशस्तिं कुर्वन् संस्कृतप्रचाराय श्रीसोमनथन्यासस्य कटिबद्धतां प्राकटयत्। श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य प्रतिष्ठापनाय श्रीसोमनाथन्यासद्वारा तेन महान् उद्यमः विहितः आसीत् इति तेन स्वीये उद्बोधने ज्ञापितम्।

ततः परं श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य कुलपतिना श्रीमता प्रो. वेम्पटिकुटुम्बशास्त्रिणा संस्कृतप्रचाराय संस्कृतभारत्या क्रियमाणं कार्यं बहुशः श्लाघितम्। पुरा इयमेव संस्कृता वाणी मनुष्यैः उच्यमानासीत् इति वाल्मीकि-रामायणे वर्णितं सीता-हनुमतोः संवादस्य प्रसङ्गं श्रावयता तेन प्रतिपादितम्।

सम्मेलनेऽस्मिन् गुजरात-राज्यस्य कृषिमन्त्री नागरिकौड्डयनमन्त्री च श्रीमान् जसाभाई बारडः अपि उपस्थितः आसीत्। सः संस्कृतस्य महान् समर्थकः वर्तते। संस्कृतस्य उन्नत्या एव राष्ट्रस्य उन्नतिः भवितुम् अर्हति इति तेन उक्तम्। पुरा गुजरात-राज्ये संस्कृतविश्व-विद्यालयस्य स्थापना भवतु इति प्रस्तावः तेन मन्त्रालये महता कण्ठेन समर्थितः आसीत् इति तेन स्वीये भाषणे ज्ञापितम्।



सम्मेलने मुख्यवक्ता आसीत् संस्कृतभारत्याः अखिलभारतीयः संघटनमन्त्री श्रीमान् दिनेश कामतः। तेन स्वीये भाषणे उक्तं यत् - संस्कृतभाषा स्वभावतः एव भारतस्य राष्ट्रभाषा अस्ति। संस्कृताध्ययनस्य अभावे एव इतराः भारतीयभाषाः भ्रश्यमानाः सन्ति। अतः भारतीयसंस्कृतेः संरक्षणाय संस्कृतस्य रक्षणम् अत्यावश्यकम्।

दिनेशकामतमहोदयस्य भाषणानन्तरं संस्कृतस्य विकासाय संरक्षणाय च सज्जीकृतः प्रस्तावः सभायां पठितः। सोऽयं प्रस्तावः सभायां सर्वानुमत्या